Chapter 6 Citra Deepa

यथा चित्रपटे दृष्टम् अवस्थानां चतुष्टयम्।

परमात्मनि विज्ञेयं तथा अवस्था-चतुष्टयम्॥ १॥

यथा धौतः घट्टितः च लाञ्छितः रञ्जितः पटः।

चिदन्तर्यामी सूत्रात्मा विराट् आत्मा तथा ईर्यते॥ २॥

स्वतः शुभ्रोत्र धौतः स्यात् घट्टितोन्न-विलेपनात्।

मष्याकारैः लाञ्छितः स्यात् रञ्जितो वर्णपूरणात्॥ ३॥

स्वतः चिदन्तर्यामी तु मायावी सूक्ष्म-सृष्टितः।

सूत्रात्मा स्थूल-सृष्ट्या एव विराडित्युच्यते परः॥ ४॥

ब्रह्माद्यास्स्तम्ब-पर्यन्ताः प्राणिनोत्र जडा अपि।

उत्तमाधम-भावेन वर्तन्ते पट-चित्रवत्॥ ५॥

चित्रार्पित-मनुष्याणां वस्त्राभासाः पृथक् पृथक्।

चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः॥ ६॥

पृथक् पृथक् चिदाभासाः चैतन्याध्यस्त-देहिनाम्।

कल्प्यन्ते जीव-नामानः बहुधा संसरन्ति अमी॥ ७॥

वस्त्राभास-स्थितान् वर्णान् यद्वत् आधार-वस्त्रगान्।

वदन्ति अज्ञाः तथा जीव-संसारं चिद्-गतं विदुः॥ ८॥

चित्रस्थ-पर्वतादीनां वस्त्राभासः न लिख्यते।

सृष्टिस्थ-मृत्तिकादीनां चिदाभासः तथा न हि॥ ९॥

संसारः परमार्थः अयं संलग्नः स्वात्मवस्तुनि ।

इति भ्रान्तिरविद्या स्यात् विद्ययैषा निवर्तते ॥ १० ॥

आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः ।

इति बोधो भवेत् विद्या लभ्यतेसौ विचारणात् ॥ ११ ॥

सदा विचारयेत् तस्मात् जगत्-जीव-परात्मनः ।

जीव-भाव-जगत्-भाव-बाधे स्वात्मैव शिष्यते ॥ १२ ॥

नाप्रतीतिस्तयोर्बाधः किन्तु मिथ्यात्व-निश्चयः ।

नो चेत् सुषुप्ति-मूर्च्छादौ मुच्येतायत्नतो जनः ॥ १३ ॥

परमात्मा अवशेषोपि तत्-सत्यत्व-विनिश्चयः ।

न जगत् विस्मृतिर्नो चेत् जीवन्-मुक्तिर्न सम्भवेत् ॥ ६ ॥१४ ॥

परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा ।

तत्रापरोक्ष-विद्याप्तौ विचारोयं समाप्यते ॥ ६ ॥१५ ॥

अस्ति ब्रह्मेति चेत् वेद परोक्ष-ज्ञानमेव तत् ।

अहं ब्रह्मेति चेत् वेद साक्षात्कारः स उच्यते ॥ १६ ॥

तत्-साक्षात्कार-सिद्धयर्थम् आत्मतत्त्वं विविच्यते ।

येनायं सर्व-संसारात् सद्य एव विमुच्यते ॥ ६ ॥१७ ॥

कूटस्थो ब्रह्मजीवेशौ इत्येवं चित् चतुर्विधा ।

घटाकाश-महाकाशौ जलाकाशाभ्र-खे यथा ॥ ६ ॥१८ ॥

घटावच्छिन्न खे नीरं यत् तत्र प्रतिबिम्बितः ।

साभ्र-नक्षत्र आकाशः जलाकाशः उदीर्यते ॥ १९ ॥

महाकाशस्य मध्ये यत् मेघ-मण्डलम् ईक्ष्यते ।

प्रतिबिम्बतया तत्र मेघाकाशो जले स्थितः ॥ ६ ॥ २० ॥

मेघांशरूपम् उदकं तुषाराकार-संस्थितम् ।

तत्र ख-प्रतिबिम्बोयं नीरत्वात् अनुमीयते ॥ २१ ॥

अधिष्ठानतया देहद्वयावच्छिन्न-चेतनः ।

कूटवन् निर्विकारेण स्थितः कूटस्थः उच्यते ॥ ६ ॥२२ ॥

कूटस्थे कल्पिता बुद्धिः तत्र चित्-प्रतिबिम्बकः ।

प्राणानां धारणात् जीवः संसारेण सः युज्यते ॥ २३ ॥

जलव्योम्ना घटाकाशः यथा सर्वस्तिरोहितः ।

तथा जीवेन कूटस्थः सोन्योन्याध्यासः उच्यते ॥ ६ ॥२४ ॥

अयं जीवो न कूटस्थं विविनक्ति कदाचन ।

अनादिरविवेकोयं मूलाविद्येति गम्यताम् ॥ ६ ॥२५ ॥

विक्षेपावृति-रूपाभ्यां द्विधा अविद्या व्यवस्थिता ।

न भाति नास्ति कूटस्थः इति आपादनमावृतिः ॥ २६ ॥

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते ।

न भाति न अस्ति कूटस्थः इति बुद्ध्वा वदति अपि ॥ ६ ॥२७ ॥

स्वप्रकाशे कुतः अविद्या तां विना कथम् आवृतिः ।

इत्यादि तर्कजालानि स्वानुभूतिर् ग्रसत्यसौ ॥ ६ ॥२८ ॥

स्वानुभूतौ अविश्वासे तर्कस्यापि अनवस्थितेः।

कथं वा तार्किकं-मन्यः तत्त्वनिश्चयमाप्नुयात्॥ ६॥२९॥

बुद्धि आरोहाय तर्कः चेत् अपेक्षेत तथा सति।

स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यताम्॥ ६॥३०॥

स्वानुभूतिरविद्यायाम् आवृतौ च प्रदर्शिता।

अतः कूटस्थचैतन्यम् अविरोधीति तर्क्यताम्॥ ३१॥

तच्चेत् विरोधि केनेयम् आवृतिर् हि अनुभूयताम्।

विवेकस्तु विरोधि अस्याः तत्त्वज्ञानिनि दृश्यताम्॥ ३२॥

अविद्याावृत कूटस्थे देहद्वय-युता चितिः।

शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यासः एव हि॥ ३३॥

इदम् अंशः च सत्यत्वं शुक्तिगं रूप्ये ईक्ष्यते।

स्वयंत्वं वस्तुता चैव विक्षेपे वीक्ष्यते अन्यगम्॥ ६॥३४॥

नील-पृष्ठ-त्रिकोणत्वं यथा शुक्तौ तिरोहितम्।

असङ्गानन्दताद्येवं कूटस्थे अपि तिरोहितम्॥ ६॥३५॥

आरोपितस्य दृष्टान्ते रूप्यं नाम यथा तथा।

कूटस्थाध्यस्त-विक्षेप-नामाहमिति निश्चयः॥ ६॥३६॥

इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते।

तथा स्वं च स्वतः पश्यन् अहमित्यभिमन्यते॥ ६॥३७॥

इदंत्व-रूप्यते भिन्ने स्वत्वाहंते तथेष्यताम्।

सामान्यं च विशेषश्च उभयत्रापि गम्यते॥ ६॥३८॥

देवदत्तः स्वयं गच्छेत् त्वं वीक्षस्व स्वयं तथा।

अहं स्वयं न शक्नोमि इत्येवं लोके प्रयुज्यते॥ ६॥३९॥

इदं रूप्यम् इदं वस्त्रम् इति यद्वत् इदं तथा।

असौ त्वम् अहमित्येषु स्वयमित्यभिमन्यते॥ ६॥४०॥

अहंत्वात् भिद्यतां स्वत्वं कूटस्थे तेन किं तव।

स्वयं-शब्दार्थः एवैषः कूटस्थः इति मे भवेत्॥ ६॥४१॥

अन्यत्व-वारकं स्वत्वं इति चेत् अन्य-वारणम्।

कूटस्थस्यात्मतां वक्तुः इष्टम् एव हि तत् भवेत्॥ ६॥४२॥

स्वयम् आत्मेति पर्यायौ तेन लोके तयोः सह।

प्रयोगो नास्त्यतः स्वत्वम् आत्मत्वं चान्य-वारकम्॥ ६॥४३॥

घटः स्वयं न जानाति इत्येवं स्वत्वं घटादिषु।

अचेतनेषु दृष्टं चेत् दृश्यताम् आत्मसत्त्वतः॥ ६॥४४॥

चेतनाचेतन-भिदा कूटस्थात्मकृता न हि।

किन्तु बुद्धिकृताभास-कृतैवेत्यवगम्यताम्॥ ६॥४५॥

यथा चेतनः आभासः कूटस्थे भ्रान्तिकल्पितः।

अचेतनो घटादिश्च तथा तत्रैव कल्पितः॥ ६॥४६॥

तत्तेदंते अपि स्वत्वम् इव त्वम्-अहमादिषु ।

सर्वत्रानुगते तेन तयोरपि आत्मता इति चेत् ॥ ६ ॥४७ ॥

ते आत्मत्वेप्यनुगते तत्तेदंते ततस्तयोः ।

आत्मत्वं नैव सम्भाव्यं सम्यक्त्वादेर् यथा तथा ॥ ६ ॥४८ ॥

तत्तेदन्ते स्वतान्यत्वे त्वंताहन्ते परस्परम् ।

प्रतिद्वन्द्वितया लोके प्रसिद्धे नास्ति संशयः ॥ ६ ॥४९ ॥

अन्यतायाः प्रतिद्वन्द्वी स्वयं कूटस्थः इष्यताम् ।

त्वंतायाः प्रतियोग्येषः अहमित्यात्मनि कल्पितः ॥ ६ ॥५० ॥

अहंता स्वत्वयोर् भेदे रूप्यतेदंतयोरिव ।

स्पष्टे अपि मोहम् आपन्नाः एकत्वं प्रतिपेदिरे ॥ ६ ॥५१ ॥

तादात्म्याध्यासः एवात्र पूर्वोक्ता अविद्यया कृतः ।

अविद्यायां निवृत्तायां तत् कार्यं विनिवर्तते ॥ ६ ॥५२ ॥

अविद्यावृत्ति तादात्म्ये विद्यया एव विनश्यतः ।

विक्षेपस्य स्वरूपं तु प्रारब्धक्षयम् ईक्ष्यते ॥ ६ ॥५३ ॥

उपादाने विनष्टे अपि क्षणं कार्यं प्रतीक्षते ।

इत्याहुस्तार्किकास्तद्वत् अस्माकं किं न सम्भवेत् ॥ ६ ॥५४ ॥

तन्तूनां दिनसंख्यानां तैस्तादृक् क्षणः ईरितः ।

भ्रमस्यासंख्य-कल्पस्य योग्यः क्षणः इहेष्यताम् ॥ ६ ॥५५ ॥

विना क्षोदक्षमं मानं तैर् वृथा परिकल्प्यते ।

श्रुति-युक्ति-अनुभूतिभ्यः वदतां किं नु दुःशकम् ॥ ६ ॥५६ ॥

आस्तां दुस्तार्किकैः साकं विवादः प्रकृतं ब्रुवे ।

स्वाहमोः सिद्धम् एकत्वं कूटस्थ-परिणामिनोः ॥ ६ ॥५७ ॥

भ्राम्यन्ते पण्डितं-मन्याः सर्वे लौकिक-तैर्थिकाः ।

अनादृत्य श्रुतिं मौख्र्यात् केवलां युक्तिम् आश्रिताः ॥ ६ ॥५८ ॥

पूर्वापर-परामर्श-विकलाः तत्र केचन ।

वाक्याभासान् स्वस्वपक्षे योजयन्त्यप्यलज्जया ॥ ६ ॥५९ ॥

कूटस्थादि-शरीरान्त-संघातस्यात्मतां जगुः ।

लोकायताः पामराः च प्रत्यक्षाभासम् आश्रिताः ॥ ६ ॥६० ॥

श्रौतीकर्तुं स्वपक्षं ते कोशमन्नमयं तथा ।

विरोचनस्य सिद्धान्तं प्रमाणं प्रतिजज्ञिरे ॥ ६ ॥६१ ॥

जीवात्म-निर्गमे देह-मरणस्यात्र दर्शनात् ।

देहातिरिक्त एवात्मा इत्याहुर् लोकायताः परे ॥ ६ ॥६२ ॥

प्रत्यक्षत्वेनाभिमता अहं-धीर् देहातिरेकिणम् ।

गमयेत् इन्द्रियात्मानं वच्मीत्यादि-प्रयोगतः ॥ ६ ॥६३ ॥

वागादिनाम् इन्द्रियाणां कलहः श्रुतिषु श्रुतः ।

तेन चैतन्यमेतेषाम् आत्मत्वं तत एव हि ॥ ६ ॥६४ ॥

हैरण्यगर्भाः प्राणात्मवादिनः तु एवम् ऊचिरे ।

चक्षुरादि अक्श लोपे अपि प्राणसत्त्वे तु जीवति ॥ ६ ॥६५ ॥